धीरः प्रागुक्तक्रमतश्चरेत्। प्रदत्तं गुरुणा सर्वं प्रायश्चित्तं विशुद्धिदं॥८१॥ मिथ्यादृष्ट्युपदेशाद्यैर्मिथ्यात्वं च गतस्य यः॥
विशुद्धो स च तत्त्वादौ श्रद्धानं तदं द्रुतं॥८२॥ एतं दशविधं प्रायश्चित्तं संद्धृतं शुद्धये युक्त्या कालानुसारेण कर्त्तव्यं मुनिभिः
सदा॥८३॥ महत्स्वतपोमवां प्रायश्चित्तं करोति नो। व्रतादिदोषसंशुद्ध्यर्थं त्रागं सागर्विताशयः॥८४॥ तस्य सर्वं तपो दत्तं तद्दो
षो नाशयेद्द्रुतं। स महान् खिलैर्गुणौघैः कुथिततांबूलपत्रवत्॥८५॥ प्रायश्चित्तेन निःशल्यं मनो भवति निर्मलाः दृग्ज्ञानाद्या
गुणौघाः स्युश्चारित्रं शशिनिर्मलं॥८६॥ संघमान्यमभीतिः स्यान्निःशल्यं मरणोत्तमं। इत्याद्या बहवोन्ये च जायंते स
द्गुणाः सतां॥८७॥ विज्ञायेति यदा कश्चिद्दोष उत्पद्यते व्रते। प्रायश्चित्तं तदैवात्र कर्त्तव्यं तद्विशुद्धये॥८८॥ कषायेंद्रिचौरण
शात्रवाविनयनं बलात्। विनयो वा सतां नीचैर्वृत्तिः रत्नत्रयस्य या॥८९॥ तद्वृत्तां स जिनैः प्रोक्तो विनयो निष्टघातकः विश्वावि
घांकरीभूतः पंचधा गुणसागरः॥९०॥ दर्शनज्ञानचारित्रतपसां विनयो महान्। उपचाराभिधश्चेति विनयः पंचधा मतः॥
९१॥ ये पदार्था जिनैः प्रोक्तास्तथास्त एव नान्यथा। वीतरागाश्च सर्वज्ञा यतो नासत्यवादिनः॥९२॥ इति युक्तिविचाराद्यै
स्तत्त्वादौ निश्चयोऽचलः क्रियते योऽखिले जैनागमेऽर्हद्धर्मयोगिषु॥९३॥ निःशंकितादिसर्वेषामंगानां यच्च धारणं। शंकादि
त्यजनं सत्सम्यक्त्वविचारणे॥९४॥ भक्तिर्दृढतरा चैत्यश्रुतार्हन्मुनिधर्म्मिषु। सम्यग्दृष्टिजनादौ च वरर्द्धिर्मुक्तिपथे

तेनंशिष्यांश्चमाद्वात्रिंशद्दंडांतरभूतलं।विहरेद्दत्तेनिसंदीक्षयालघुसंयतान्॥६७॥लभतेमहि.तेभ्यःप्रतिवंदना
सहाखिलं।गुरुणालोचनंकुर्यान्मौनंसार्द्धंचयोगिभिः॥६८॥धृत्वांप्राङ्मुखांपिच्छिकांचरेत्सारणंसदा।पंचपंचौपवा
सैर्जघन्येनोत्कृष्टतोमुदा॥६९॥षण्मासैर्मध्यमैःशक्त्यांबकुभेदैर्महाबलः।प्रायश्चित्तंकरोत्येवंद्विषड्वर्षांतमद्भुतं
॥७०॥सएवंदर्प्पतोदोषान्प्रागुक्तानाचरेद्यदि।अयंस्वगणोपस्थानंदोषस्यकरो॥७१॥सापराधःप्रहेतव्यःसू
रिणागणिनंप्रति।सोप्याचार्योगिराकल्पात्तस्यालोचनमंजसा॥७२॥प्रायश्चित्तमदत्वाचार्यांतरंप्रापयेच्चतं।इत्थे
वंसप्रहेतव्योयावत्सूरिश्चसप्तमः॥७३॥प्रेषितःपश्चिमेनैवपूर्वाचार्यंप्रतिस्फुटं।प्रायश्चित्तंचरेत्सर्वंप्रागुक्तंसं
लांछितः॥७४॥परिहारस्यभेदोयंद्विधाप्रोक्तोजिनागमात्।पारंचिकमितीवद्येप्रायश्चित्तंसुदुःकरं॥७५॥तीर्थ
करगणभृत्संघजिनसूत्रादिधर्मिणां।करोत्यासादनंरौडोननुमस्यादशातियः॥७६॥जिनमुद्रांममास्मादीनांभंजेद्द्रांड
योषितः।इत्याद्यैरन्यैर्दुराचारैःकुर्याद्धर्मस्यदूषणं॥७७॥तस्यपारंचिकंप्रायश्चित्तंभवतिनिश्चितं।चातुर्वर्ण्योस्वसं
घस्थाःसंभूयश्रवणामुवि॥७८॥एषोवंद्योमहापापीबाह्यःश्रीजिनशासनात्।घोषयित्वेतिदत्वानुपस्थापनंसु
दुःकरं॥७९॥प्रायश्चित्तंस्वदेशात्तंनिर्घाटयंतिदोषिणं।स्वधर्मरहितेक्षेत्रेसोपिगावामहाबलः॥८०॥इदसंहन

क्तित्रयोकितो प्रणामः शिरसा भाले स्वांजलीकरणं सदा ॥२०॥ गुरोरागछतः स्वाभिमुखयानं प्रागछतः । अनुव्रज
नमंस्यर्थं भक्तिरागप्रकाशनं ॥२१॥ नीचैस्स्थानं क्रियं त्रीचं गमनं शयनासनं । आसनज्ञानशौचोपकरणादिसमर्प्प
णं ॥२२॥ शून्यागारगुहादीनां मन्निष्पं च निवेदनं । गुरुकायक्रमादीनां स्पर्शनं मर्द्दनं करै ॥२३॥ आदेशकरणं
संस्तरादिं प्रस्तारणं निशि । ज्ञानोपकरणादीनां प्रतिलेखनमन्वहं ॥२४॥ इत्याद्यन्यो यथा योग्य उपकारो विधीय
ते । कायेन सद्गुरोर्यः सविनयः कायिकोऽखिलः ॥२५॥ आचार्य भगवत्पूज्यपादभट्टारकादिभिः नामभिः प्रवरैः पूज
वचनं मधुरं वचः ॥२६॥ हिततथ्यमितादीनां वचसां भाषणं गिरां । जिनसूत्रानुसारेण भाषणं पापदूरगं ॥२७॥ उ
पशांतवचो वाच्यमगृहस्थवचः श्रुतं । अकर्कशं वचः सारं सुप्रस्पष्टमनिष्ठुरं ॥२८॥ इत्यादि निरवद्यं संभूयते वच
नं वरं । गुरोरंते स सर्वोपि वाचिको विनयो महान् ॥२९॥ दुःकर्मागमनद्वारसन्मुखं वरसुखावहंतो । दुर्ध्यानद्वेषरागा
दिलीनं चिंताशातांकुलं ॥३०॥ त्यक्त्वा स्वपरिणामं सु तत्ववैराग्यवासितं । सद्दर्थधर्म्मसद्भावागमचिंतादितत्परं ।
॥३१॥ स्वान्येषां हितदं शुद्धं धार्यते यत्रिजं मनः । गुरोः पार्श्वे सविश्वो मानसिको विनयो वरः ॥३२॥ प्रत्यक्षे सद्गु
रूणां यो विनयः क्रियते बुधैः । त्रिशुद्ध्या त्रिविधः सोऽत्र प्रत्यक्षविनयो मतः ॥३३॥ परोक्षे सद्गुरूणां चं स्मरणास

षो॥९५॥ इत्यादियकुभांचारमंपरंवाविधीयते। विनयोदर्शनाख्यः ससर्वोगुणार्णवोघहृत्॥९६॥ कालाद्यैरष्टधाचारैर्वि
नये। नोचेनादिभिः। हृत्स्थानामंगपूर्वाणां ज्ञानार्थी ज्ञानहानये॥९७॥ त्रिशुद्ध्यापठनंशुद्धंपाठंनैवचयोगिनां। चिंतनं
हृदयेत्यर्थपरिवर्तनमंजसा॥९८॥ ख्यापनंकीर्तनंलोकेप्रकाशनमनारतं। ज्ञानिनांभक्तिसन्मानंज्ञानादिगुणाभा
षणं॥९९॥ इत्याद्यैर्न्यःश्रुतज्ञानगुणग्रहणमूर्जितं। क्रियतेसंसमस्तोपिज्ञानाख्योविनयोद्भुतः॥१००॥ कषायेंद्रियचौ
राणांप्रमादानांचवर्जनं। व्रतगुप्तिसमित्याद्यांचरणेयत्नमन्वहं॥१॥ महातपोधनानांचश्चचांचरणांमद्भुतं। अंजली
करणंभक्त्याप्रणामंहस्तशालिनां॥२॥ इत्याद्यैर्न्यःसुचारित्रमहात्म्यस्यप्रकाशनं। लोकेविधीयतेयःसचारित्रविनयो
खिलः॥३॥ आतापनादिसद्योगेष्युत्तराख्येगुणेद्भुते। दुःकरेचद्विषड्भेदेघोरेतपसिदुर्द्धरे॥४॥ श्रद्धोत्साहौनुरागाकं
लादीनांकरणंमहत्। तपोधिकयतीनांचप्रणामस्तवनादिकं॥५॥ षडावश्यकसंपूर्णाश्चित्तक्लेशादिवर्जनं। तप
सांकरणंवीर्यादानंपर्वोपवासनिर्जयः॥६॥ इत्याद्यैर्न्यस्तपोनघ्यंगुणानांयस्यकीर्तनं। सत्तपोजन्महर्द्धीनांसंतपोवि
नयोखिलः॥७॥ सकायवाङ्मनोभेदैरुपचारोजिनागमे। विनयस्त्रिविधःप्रोक्तः। कायवाक्चित्तशुद्धिदः॥ सप्रत्य
क्षपरोक्षाभ्यांप्रत्येकंद्विविधःस्मृतः। इत्येतेषड्प्रकाराउपचारविनयेमताः॥८॥ अभ्युत्थानंक्रियाकर्मपुरस्म

स संतुष्टो धीमान् ध्याता स्य कथ्यते ॥ सर्वार्थसिद्धिपर्यंतं सर्वाभीष्टार्थसाधकं । तीर्थेकृदादिसत्पुण्यकरं ध्यानस्य स-
त्फलं ॥४८॥ पीतादित्रिकलेश्योत्थं बलाध्यानं किलोऽस्य च । क्षयोपशमिको भावः कालांतर्मुहूर्तिकः ॥४९॥ गुण-
स्थानेषु तत्स्याच्चाविरतादिषु निश्चितं । सरागेषु कुरागघ्नं धर्मध्यानं शुभाकरं ॥५०॥ मोहप्रकृतिसप्तानां ध्या-
नमेतत्क्षयंकरं । एकविंशतिमोहप्रकृतीनां शमकारणं ॥५१॥ यत्नेन महता जातमेतद्ध्यानं सुखाकरं । कुर्वंतु ध्या-
निनो नित्यं शुक्लं विश्वार्द्धिधर्मदं ॥५२॥ शुक्लं परमशुक्लं च शुक्लध्यानमिति द्विधा । सपृथक्त्ववितर्कं च वीचारं शु-
क्लमादिमं ॥५३॥ तथैकत्ववितर्कावीचारशुक्लं द्वितीयकं । इति शुक्लं द्विधा ध्यानं केवलज्ञाननेत्रदं ॥५४॥ प्रतिपाति
वि निःक्रांतं शुक्लं सूक्ष्मक्रियाह्वयं । समुच्छिन्नक्रियं शुक्लं द्विधेति परमं मतं ॥५५॥ तद्बाह्यं ध्यात्मिकाभ्यां च शुक्लध्या- स्म
नमपि द्विधा । अत्यंतसाम्यतोपन्नं नेत्रस्पंदादिवर्जितं ॥५६॥ सर्वद्वंद्वातिगं बाह्यं शुक्लं स्वतांनुवि मनःशुद्धिकरं यंते
तं स्वसंवेद्यं ध्यात्मिकं महत् ॥५७॥ नानाभेदं पृथक्त्वं च वितर्कश्चाखिलं श्रुतं । अर्थव्यंजनयोगानां वीरः संक्रमो चा
भवेत् ॥५८॥ पृथक्त्वेन वितर्काभ्यां विचारेण मुनीश्वराः । ध्यायंति ध्यानमात्मज्ञाः शुक्लं तत्प्रथमं मतं ॥५९॥ एक-
त्वेन वितर्केणावीचारेणातिनिश्चलं । ध्यायंति क्षीणमोहा यद्ध्यानं द्वितीयमेव तत् ॥६०॥ काययोगेऽतिसूक्ष्मे स ७१

मंदिरात् । अत्रेत्तिर्जनकाकूत्रंकारणाद्रोगसंचयात् ॥३४॥ अनंतदुखसंपूर्णात्संसाच्चसुखच्युतात् । विरक्ति-
र्यासत्तौ चित्ते विरागविचयं हितं ॥३५॥ अनंतदुःखसंकीर्णे भवेनादौ सुखातिगो । सचित्ताचित्तमिश्रादिनानु
योनिषु कर्मभिः ॥३६॥ भ्रमंति प्राणिनो श्रांतं कर्मपाशैर्हता इति । भवभ्रमणदुःखानुचिंतनं ध्यैसत्तमैः ॥३७॥ अ-
नित्याद्या अनुप्रेक्षा द्वादशानंतशर्मदाः । वैराग्यमातरो रागनाशिन्यो मुक्तिमातृकाः ॥३८॥ चिंत्यंते रागिनो याव
यत्रं वैराग्यवृद्धये । योगिभिर्योगसंशुद्धैः संस्थानविचयं हितं ॥३९॥ प्रमाणीकृत्य तीर्थेशान्सर्वज्ञान्दो-
षदूरगान् । तत्प्रणीतेषु सूक्ष्मेषु विश्वदृग्गोचरेषु च ॥४०॥ लोकालोकादितत्त्वेषु धर्मेषु मुक्तिवर्त्मसु । रुचिः श्र-
द्धाप्रतीतिर्या तदाज्ञाविचयं सतां ॥४१॥ स्याद्वादनयमालंब्य हेतुदृष्टांतयुक्तिभिः । पूर्वापराविरोधेन तर्कानु-
सारिधीधनैः ॥४२॥ सर्वज्ञोक्ताः पदार्थाद्याः स्थाप्यंते यत्र भूतले । याथातथ्येन चित्ते वा तद्धेतुविचयाभिधं ॥४३॥ ए-
तद्दशविधं धर्म्यध्यानं शुक्लनिबंधनं । ध्यातव्यं ध्यानिभिर्नित्यं विश्वश्रेयःकरं परं ॥४४॥ ध्यानं ध्येयं बुधै-
र्ध्याताफलंमस्यानिगद्यते । ध्यानं प्रशस्तसंकल्पं परमानंदकारकं ॥४५॥ विश्वद्रव्यपदार्थादि श्रीजिनाग-
ममूर्जितं । परमेष्ठिस्वरूपं च ध्येयंप्रस्याखिलंमतं ॥४६॥ अनंतज्ञानगुणैः पूर्णो विरागो विश्ववेवित् एकांतव-

Gangesh ... Digambar Jain Institute, Naria, Varanasi

वीउंसृघेतेतथातथा॥७४॥भग्नदंतोयथाहस्तीदंष्ट्राहीनोमृगाधिपः।स्वकार्यसाधनेशक्तोध्यानहीनस्तथायतिः॥
७५॥भवेत्तिप्रखरंध्यानंकर्मारातिनिकंदनं।ध्यायंतुयोगिनोनित्यंमनःकृत्वातिनिश्चलं॥७६॥बाह्यंसाभ्यंतरंप्रोक्तं
तापांतःशत्रुघातकं।विधेयंपरयाशक्त्यांतः।स्वर्गारिहानयेबुधैः॥७७॥एतद्द्वादशधाप्रोक्तंसमासेनमयातपः।सर्वं
ति यत्नेनमुक्त्यर्थमाचरंतुतपोधनाः॥७८॥यथाविधिनातप्तंशुद्ध्यतिकांचनं।तथाकर्मकलंकीचस्वात्मासांतर्बाह्याग्निना
मृद्धं॥७९॥वस्त्राद्याःसकलाद्रव्यायद्वद्धौताश्चवारिणा।भवंतिनिर्मलास्तद्वद्योगीतपोंबुवारिणा॥८०॥तपोने
घजयोगेनजन्ममृत्युजरारुजः।पंचाक्षरूपारातिभिःसार्द्धंविलीयंतेघरात्रयः॥८१॥चतुर्ज्ञानधरोमुक्तिगामीशक्र
गणार्चितः।स्ववीर्यप्रकटीकृत्यकरोत्यैवपरंतपः॥८२॥आदिदेवोपिवर्षांतेपारणंकृतवान्भुवि।अन्यैरपिजिनाधी
शैःसर्वैःकृतंतपोमहत्॥८३॥धीरोबाहुबलीकृत्वावर्षैकंप्रोषधानं।व्युत्सर्गस्थःसुयोगेनकेवलज्ञानमापभोः॥८४॥ पर्व
इत्याद्याःप्रवराःसर्वेपुराणपुरुषाअहो।बलाद्धन्येतपःकृत्वाघोरंमुक्तिपदंययुः॥८५॥गताःयांतिचयास्यंतिमुक्तिं
येत्रमुमुक्षवः।कर्मारीन्केवलंहत्वातपोभिस्तेनचान्यथा॥८६॥मुक्तिमार्गप्रवृत्तानांत्रिरत्नश्रीयुतात्मनां।
विघटंतेस्वचौराद्यास्तपःसुभटताडिताः॥८७॥सहायीकृत्ययोधीमांस्तपःसुभटमूर्जितं।ब्रजेन्मुक्तिपथे

Ganesh Varni Digambar Jain Sansthan

CC0.In Public Domain. Digitized by Sarayu Trust, Gangotri

तृतीयध्यानस्यफलं ॥ चतुर्थे ध्यानस्य फलं ५ प्रथम॥ स नमः

स्थितस्यापि सयोगिनः कथ्यते चोपचारेण तृतीयं निश्चलं हि तत् ॥६१॥ येन ध्यानेन चायोगी निःक्रियो योगवर्जि-
तः याति मुक्तिपदं शुक्लं तच्चतुर्थं क्रियातिगं ॥६२॥ ध्यानं ध्येयमथास्यापि ध्याता ध्यानफलं भवेत् । सर्वसंकल्पनि-
क्रांतं ध्यानं स्वात्मानुचिंतनं ॥६३॥ स्वात्मतत्वं परं ध्येयं ध्याताद्ययोश्च पूर्ववित् । अंत्ययोः केवली प्रोक्त उपचाराज्जि-
नाधिपैः ॥६४॥ त्र्यादिसंहननस्यैव शुक्लमेकस्य तत्त्रयं फलं सर्वार्थसिद्धं तन्मोक्षश्च शुक्लस्य कथ्यते ॥६५॥ केवल-
ज्ञानसाम्राज्यं द्वितीयस्यापरं फलं । कृत्स्नकर्मक्षयो नित्यं सौख्यं मुक्तिपदं ध्रुवं ॥६६॥ उपशांतकषायस्य शुक्लमा-
द्यं जिनोदितं तथा क्षीणकषायस्य निःकषायस्य चापरं ॥६७॥ शुक्ललेश्याबलाध्यानं स्थितिरांतर्मुहूर्त्तिकी क्षा-
योपशमिको भावश्चाद्यशुक्लस्य कथ्यते ॥६८॥ एतच्चतुर्विधं ध्यानं दृढसंहनना भुवि । यथातथ्येन कुर्वंतु विक-
ल्पातीतचेतसः ॥६९॥ भावनां भावयंत्वेवं शुक्लानां स्वात्मसंज्ञां समं हीनसंहननादत्ताः शुक्लध्यानोत्सयैनिद्रां ।
७०॥ यादृशं सिद्धसादृश्यं स्वात्मानं ध्यायति स्फुटं । तादृशं निर्मलं योगी निश्चितं लभते चिरात् ॥७१॥ निर्जरां सद्ध्या-
नमात्रेणानंतदुःकर्मपुद्गलाः । क्षीयंते ध्यानिनां नूनं यथा वज्रेण चाद्रयः ॥७२॥ ध्यानप्रदीपयोगेन मोहाज्ञानत-
मोऽखिलं । प्रणश्यति सतां शीघ्रं जायंते ज्ञानसंपदः ॥७३॥ योगशुद्धिः प्रजायेत सद्ध्यानेन यथा यथा पुंसां महर्द्धयः स-

Jangamwadi Math Collection, Varanasi

CC-0. In Public Domain. Digitized by ... Trust/eGangotri

दीक्ष्यं कुर्वंत्वं निगूहितपराक्रमाः ॥२॥ प्राणेंद्रियद्विभेदाभ्यां संयमो द्विविधो मतः । स प्राणासंयमः सप्तदशप्रकार
एवं हि ॥३॥ पृथ्व्यप्तेजोमरुत्कायानां वनस्पतिदेहिनां । यत्नेन रक्षणं यत्स पंचधा कायसंयमः ॥४॥ द्वित्रितुर्याक्ष
पंचेंद्रियाणां यत्प्रतिपालनं । त्रसभेदेन संप्रोक्तश्चतुर्द्धा संयमः सतां ॥५॥ अजीवानां तृणादीनामछेदनं न खादि
भिः । यस्स संयमिनां प्रोक्तः संयमोऽजीवसंज्ञकः ॥६॥ ज्ञानोपकरणादीनां यच्चोऽत्रां प्रतिलेखनं । नेत्रेण दर्शनं तत्स्प
यत्नात्संयमनं महत् ॥७॥ मृदुपिच्छिकया वारं वारं यत्प्रतिलेखनं । दर्शनं नयनाभ्यां सोप्रतिलेखनसंयमः ॥८॥ जीव
मर्दनबाधादिकरं दुःप्रतिलेखनं । तस्य संयमनं सर्वप्रमादमंतरेणायतं ॥९॥ स्वस्थानप्राणिदयाहेतुं प्रमार्जनं मुहुर्मुहु
रुक्तः सो जिननाथैर्दुःप्रतिलेखनसंयमः ॥१०॥ उपेक्षणमुपेक्षा च धर्मोपकरणादिके । व्यवस्थाप्यातिकालेनादर्शन
तत्र जन्मिनां ॥११॥ सम्मूर्छनं विलोक्योपेक्षायाः संयमनं मुहुः । प्रत्यहं दर्शनं यद्विलोपेक्षासंयमोऽत्र सः ॥१२॥ यश्चापह
रणं पिच्छिकयैकाक्षादिदेहिनां । अन्यत्रोद्रूपणं तस्मात्तस्य संयमनं परं ॥१३॥ अनिराकरणं यन्नात्तत्रैव परिरक्षणं । प
सोऽपहरणाख्योऽत्र संयमो यमिनां स्मृतः ॥१४॥ मनोवचनकायानां निसर्गचंचलात्मनां । ध्यानाद्यैर्निग्रहो यः स त्रि
विधो योगसंयमः ॥१५॥ एतेऽत्र योगिनां सप्तदशभेदाः प्ररूपिताः संयमस्य गणाधीशैरागमेऽत्र तत्त्वशुद्धिदाः ॥१६॥ पंच

दाँ धैर्यं वृद्धं तस्य न जातु चित् ॥ ८८ ॥ तपोलंकारिणो नूनं मंस्वा सत्काशिवासेजा । हृणौ स्वयं च न संदेहः कावोत्तरीशक्रबोधि
तां ॥ ८९ ॥ अहमिंद्रपदं पूज्यं देवराजपदं महत् । चक्रनाथपदं चान्यद्बलदेवादिसत्पदं ॥ ९० ॥ लौकांतिकपदं सारं ग
णेशादिपदं परं । तपःफलेन जायेत तपस्विनो जगन्नुतं ॥ ९१ ॥ अनंतमहिमोपेतास्तीर्थनाथविभूतयः । तपसा धीम
तां सर्वा जायंते मुक्तिमातृकाः ॥ ९२ ॥ त्रिजगन्नाथसंसेव्यान् भोगान् पंचाक्षपोषकान् । तपोधना लभंते च सौख्यं वाचा
मगोचरं ॥ ९३ ॥ तपोमंत्रवराकृष्टा संपल्लोकत्रयोद्भवा । तपोमाहात्म्यतो गुर्वी संपद्येत तपस्विनां ॥ ९४ ॥ तपश्चिंता
मणिर्दिव्यस्तपः कल्पद्रुमो महान् । तपो निस्संनिधानं तपः कामधेनुरूर्जिता ॥ ९५ ॥ यद्दूरं यद्दुराराध्यं यच्चालोकत्र
ये स्थितं । अनर्घ्यं वस्तु तत्सर्वं प्राप्यते तपसा चिरात् ॥ ९६ ॥ ये तपः कुर्वते नो हो सत्वहीनाः खलं पठाः । नयेद्रोगत्र
जं तेषां मंत्रं लंघनराशिदं ॥ ९७ ॥ ततः स्तीव्रमहादुःखक्लेशादिशतसंकुलं । अहो स्वपापपाकेन जन्म श्वभ्रा
दिदुर्गतौ ॥ ९८ ॥ इति मत्वा बुधा निस्सांडित्वा पंचाक्षतस्करान् । स्वशक्तिं प्रकटीकृत्य संचरंत्वं च तपोनघं ॥ ९९ ॥ बलं
वीर्यं निजं सर्वं प्रकटीकृत्य योगिनां । संयमाचरणाय स्ववीर्याचारो जिनैर्मतः ॥ १०० ॥ रसाहारौषधाद्यैश्च जनितं
बलमुच्यते । वीर्यं वीर्यांतरायस्य क्षयोपशमसंभवं ॥ १ ॥ अनयोः प्राप्य सामर्थ्यं तपोयोगादिसंयमान् । व्यक्तसंगा

सिद्धनाथैस्त्रिविधमुनिगणैराहतायेत्रयत्नात्तैस्सर्वैर्धर्म्मनाम्निजगतिगुरवोमेप्रदद्युःस्वभूती ॥२६॥ इतिभट्टा
रकश्रीसकलकीर्त्तिविरचितेश्रीमूलाचारप्रदीपकाख्येमहाग्रंथेपंचाचारव्यावर्णनेज्ञानचारित्रतपोवीर्याचार
वर्णनोनामषष्ठोधिकारः ॥६॥ श्रीमतस्तीर्थनाथांश्चसमाचारप्ररूपकान् ॥ सिद्धान्साधूनहंस्तुत्यान्गुणाब्धी
न्नौमिसिद्धये ॥१॥ अथयःसम्यगाचारःसमानःसर्वयोगिनां समताजोथवावक्ष्येसमाचाराख्यमेवतं ॥२॥ एक
औघिकसंज्ञोद्वितीयःपदविभागिकः इत्येवंसंसमाचारोद्विधोक्तःश्रीजिनागमे ॥३॥ औघिकोपिसमाचारोदशभे
दोजिनाधिपैःमतोनेकविधोमूलाचारेपदविभागिकः ॥४॥ इच्छाकारोहिमिथ्याकारस्तथाकारआसिकानिषेधि
काकिलापृच्छाप्रतिपृच्छाचछंदनं ॥५॥ सन्निमंत्रणएवोपसंपद्दशमिनामिमे । दशभेदाःसमाख्याताऔघिक
स्यसमासतः ॥६॥ इष्टेरत्नत्रयादौवेच्छाकारःशुभकर्मणि । अपराधेखिलेमिथ्याकारोव्रताद्यतिक्रमे ॥७॥ प्रतिश्र
वणेयोगेसिद्धांतार्थानांतथेवैवाहिं ॥ गुहाश्मन्यगृहादेर्निर्गमनेत्रासिकास्मृता ॥८॥ दैवाद्यहंगुहाद्यंतःप्रवेशेचनै
षेधिका ॥ स्वकार्यारंभणेकार्यःपृच्छागुर्वादियोगिनां ॥९॥ गुरुसाधर्म्मिकाद्यन्यैःपूर्वंनिसृष्टवस्तुनि ॥ पुनस्तद्ग्रहणे
युक्त्याप्रतिपृच्छाशुभप्रदा ॥१०॥ सूरिसाधर्म्मिकादीनांगृहीतेपुस्तिकादिके ॥ सेवनंतदभिप्रायेणाछंदनमेवतत् ॥

यदृक्तंतसर्वं२ =तसमिच्छामिहं कंडः५ =तवगुरोमिहं इच्छामि५

स्वव्रजं तां खस्वविषयेषु विरागिभिः। त्रसाद्यैर्दमनं यं स पंचेंद्रियसंयमः ॥१७॥ स्वेछया गछतो लोके मनसो यं
न्निरोधनं। ध्यानाध्ययनकर्माद्यैर्मनःसंयम एव सः ॥१८॥ चतुर्द्दशविधा जीवसमासा यत्र यत्नतः। रक्ष्यंते योगि
भिर्मुक्त्यै स प्राणासंयमोऽद्भुतः ॥१९॥ इत्येते संयमाः सर्वे प्राणेंद्रियाभिधा बुधैः। विज्ञेया बलवीर्याभ्यां संवराय शिवाय च
॥२०॥ अनिगूहितवीर्याणां स्युर्विश्वे संयमाः पराः। सत्तपांसि च सर्वाणि गुणा ज्येष्ठाः शिवादयः ॥२१॥ मत्वेति संयमा
चारे तपसां करणेऽखिले। योगाद्यंन्यत्र वा कार्यं न वीर्याछादनं मनाक् ॥२२॥ एवं पंचविधान् जिनेंद्रगदितानाचारसे
दान् परान् मुक्त्यै ये निपुणा भजंति परया शक्त्या त्रिशुद्ध्याखिलान्। हत्वा घातिरिपून् समाप्य परमं ज्ञानं सुरैः पूजनं
तेऽयोगाख्यं निहत्य कर्मवपुषो यांत्येव मुक्त्यालयं ॥२३॥ येऽन्ये श्रीमुनिनायकाः सुरनताः ज्ञात्वाचरंपूर्ज्जिता नैतान्
पंचविधान् विमुक्तिजनकानाचारसारान् सदा ते मुक्त्वा त्रिजगद्भवं वरसुखं सर्वार्थसिद्ध्यादिजं राज्यं चानुस
माप्य संयममंतोऽगेछंति मोक्षं क्रमात् ॥२४॥ इति विदित तदर्थाः पंचधाचारसारान् शिवसुरगतिहेतून् कर्म
मातंगसिंहान्। कुगतिगृहकपाटान् तीर्थनाथैर्निषेव्यान् भजत शिवसुखाप्त्यै मोहशत्रुं निहत्य ॥२५॥ नमेया
चौर्जिनेंद्रैस्त्रिभुवनमहितैर्यैः प्रणीतो चरित्राचारो मुक्तिसिद्ध्यै गणधरसहितैस्तत्फलं नौत्रलेभे ॥ मोक्षोयैः

Ganesh Varni Digambar Jain Sansthan, Naria, Varanasi

द्रुणोः ॥२५॥ आतापनादियोगानां ग्रहणे तपसां मुविकरणे कायसंस्थित्यै चर्यादिव्रजने परे ॥२६॥ ग्रामादिगमने वा
न्यां विले कार्ये शुभे निड्रोस्त्रयोदीन् विनयेनैः सोष्टांगो कार्यो सुनिश्चास्तकैः ॥२७॥ यत्किंचिच्च महत्कार्यं दुःकरं धर्मसंभवं
करणीयं प्रणम्यास्त गुर्वाचार्यादिकान् खिलान् ॥२८॥ दृष्ट्वा पुनर्मुदा साधून् साधुः पृच्छति सिद्धये निजकार्यं स्वपत्तौ
विद्धि प्रतिष्ठां शुभप्रदां ॥२९॥ पुस्तकादिग्रहीतेषु विनये वंदनादिके जैनागमपदार्थानां प्रश्ने न्यधर्म्मकर्मणि
॥३०॥ गणेशऋषभादीनां विश्वंभव्यहितात्मनां ॥ दक्षैरित्थानुवृत्तिर्याचिर्यते वंदनं च यत् ॥३१॥ गुरुसाधर्मिकान्ये
षां पुस्तकादिपरिग्रहं धर्मोपकरणं वान्यदिष्ठन् गृहीतुं मां भवान् ॥३२॥ तदानीं विनयेनैः स्वैस्तेषां नत्वा पदांबुजान्
कुर्यान्निमंत्रणं योगी याचनां कार्यसिद्धये ॥३३॥ उपसंपाज्जिनैः प्रोक्ता पंचधा विनये सतां क्षेत्रे मार्गे तथा सो खेसु
खेसूत्रे महात्मनां ॥३४॥ प्राघूर्णकयतीनां विनयोपचार ऊर्जितः अंगांगमर्द्दनैः संस्तरासनादिनिवेदनं ॥३५॥
आवासभूमिसंपृच्छा पुस्तकादिसमर्प्पणं इत्यादिकरणं योऽत्र विनयोपसंपदेव सा ॥३६॥ दृग्ज्ञानसंयमाद्यांश्च सन्ते
पो नियमादयः यमशीलव्रताचाराः क्षमादिगुणराशयः ॥३७॥ यस्मिन् साम्ये मुने क्षेत्रे वर्द्धंते धीमतां सतां त
स्मिन् क्षेत्रे निवासो यः क्षेत्रोपसंपदेव सा ॥३८॥ पादोष्णागतवास्तव्यमुनीनां योगधारिणां तपःसंयमयुक्तानां गुम

Ganesh Varni Digambar Jain Institute, Varanasi

॥२१॥ गुरूपाध्यायसाधूनां धर्मोपकरणोऽशुभे। अगृहीते तदर्थं या याञ्चा सा संनिमंत्रणा॥२२॥ युष्माकमहमेवे
ति निजे गुरुकुलेऽशुभे। निसर्गः स्वासनस्याग उपसंप-सुवाकूप्रजा॥२३॥ एष उक्तः समाचारो दशधौघिकश्रा
गमो समासेन निरवित्तश्चोर्द्ध्वं वक्ष्ये पदविभागिनं॥२४॥ सूर्यस्योद्गममारभ्याहस्सु होरात्रमंडले ये नियमादिकं सर्वं
माचरंति निरंतरं॥२५॥ आचारांगभवे यत्नाछ्रमणा भवहानये। समाचारो जिनैः सौत्रः प्रोक्तः पदविभागिकः॥२६॥
पुनर्ये प्रोदिताः पूर्वमिच्छाकारादयो दश। संक्षेपाद्विस्तरेणात्र वक्ष्ये तेषां सुलक्षणं॥२७॥ संयमज्ञानधर्मोपक
रणादिकयाचने। आतापनादियोगानां ग्रहणे तपसां सतां॥२८॥ करणे पठने गानां सर्वत्र शुभकर्मणि। इच्छाकार
श्च कर्त्तव्यः परिणामो मुमुक्षुभिः॥२९॥ अतीचारे व्रतादीनां जाते गवाक्यमानसैः अशुभैश्च प्रमाददोषैरेतन्मे दुः
ष्कृतं कृतं॥३०॥ मिथ्यास्तु निःफलं सर्वं करिष्ये जातु नेदृशं। त्रिशुद्ध्या स्वापराधस्य मिथ्याकारः सतां मतः॥३१॥ सिद्धा
न्तादिमहार्थानां श्रवणे चोपदेशने। गुरूणां क्रियमाणेऽत्राऽवितथे यन्निरूपितं॥३२॥ भवद्भिः सकलार्थं तदेवमेवं न चा
न्यथा। इस्पक्कौ श्रवणं तेषां यत्तथाकार एव सः॥३३॥ गिरिकंदरजीर्णोद्यानगुहापुलिनादिषु प्रवेशसमये [illegible]
कार्यश्च बाधायै निषेधिका॥३४॥ तेभ्योऽज्ञादिप्रदेशेभ्यो निर्गमने सदा। विख्यातस्यासिका व्यंतरादिप्रीत्यै विच

द्धायै २

मूलाचा
प्र ५

कश्चित्तु विहारस्तृतीयः। सर्वैरनुज्ञातो जिनेश्वरैः ॥५३॥ सर्वो हि दृष्टतपोद्वादशांगपूर्वाखिलार्थवित्। सद्वीर्यधृ-
तिसत्त्वाढ्यः स्वाद्यसंहननो बली ॥५४॥ एकत्वभावनापन्नः शुद्धभावो जितेंद्रियः। चिरप्रव्रजितो धीमान् जिता-
शेषपरीषहः ॥५५॥ ईदृशाद्यन्यगुणग्रामो यो मुनिः संमतो जिनैः। ऋते तैकविहारी हि नान्यः स्वगुणवर्जितः ॥५६॥
मिलोत्सर्गादिकालेषु गमनागमनादिकं। अकाले शयनं निंद्यमुपवेशनमात्मनः ॥५७॥ विकथाकरणं यस्य त्वे-
कथां जल्पनं सत्त्वं। मा भूदीदृश एकाकी मे शत्रुरपि भूतले ॥५८॥ गुरोः परिभवः शास्त्रविच्छेदो जडता मुनिमालि-
नत्वं च तीर्थस्य विद्धत्वं कुशीलता ॥५९॥ पार्श्वस्थतापि नाचार इत्याद्यन्यां गुणव्रजः स्वेच्छया स्वगणं त्यक्त्वा ज-
येतैकविहारिणः ॥६०॥ कंटकप्रस्तनीकश्वगवादिसर्प्पभूरिभिः म्लेच्छचौरैर्दुर्जनैर्दुष्टैर्विसूचिकाविषादिकैः
॥६१॥ अन्यैरुपद्रवैर्घोरैरेकाकी विहरन् मुनिः। प्राप्नोत्यात्मविपत्तिं च दृगादिसद्गुणैः समं ॥६२॥ कश्चिद्गौर-
विको मंदो गृद्धिकः कुटिलाशयः। दकुव्यक्तो विषयासक्तो मायावी शिथिलो धमः ॥ आलस्यग्रसितो लुब्धो
निर्द्धर्म्मः पापधीः शावः स्वेच्छाचरणशीलो व संवेगादिगुणातिगः ॥६४॥ कुशीलः कुत्सिताचारो जिनाज्ञादूर-
गो निंद्यः संवसन्नपि गच्छेनैकाकित्वं संघाटकं परं ॥६५॥ जिनाज्ञोल्लंघनं चैकेमनवस्थास्वशासने। मिथ्यात्वाराधनं

नागमनादिकैः॥३९॥परस्परंसुखप्रश्नोव्रतदृग्ज्ञानवृद्धये।योजिनैर्गदितात्रास्त्रेमार्गोपसंपदेवसा॥४०॥उप
चारोमुनीन्द्राणांनिमित्तेसुखदुःखयोः।मठपुस्तकधर्म्मोपदेशादानादिभिःपरैः॥४१॥युष्माकंमे[illegible]हमैत्राशुकश्रु
द्येनिखिलंवचः।इत्यादिकथनंशर्म्मदुःखोपसंपदैवेचा॥४२॥सूत्रोपसंपदेकान्यार्थोपसंपसमाह्वया।तथातदु
भयीत्रेधासूत्रोपसंपदेष्यपि॥४३॥यःसूत्रपठनेयत्नःसूत्रोपसंपदत्रसा।अर्थादानेत्रयोयत्नःसार्थोपसंपदूर्जि
ता॥४४॥यत्नस्तदुभयेयोत्रसोपसंपद्द्वयात्मिका।अधुनालक्षणंकिंचिद्ब्रुवेपदविभागिनः॥४५॥अथकश्चिन्महाप्रा
ज्ञः।समर्थःसकलैर्गुणैः।वीर्यधैर्यतपोयोगश्रुताद्यैःसंयताग्रणीः॥४६॥स्वगुर्वादिगतंसर्वंश्रुतंज्ञात्वापरागम
ज्ञातुमिछन्प्रणम्योच्चैःपृच्छतीतिनिजंगुरुं॥४७॥युष्मत्पादप्रसादेनभगवन्सूरिमूर्ज्जितं।सर्वागमपरिज्ञा
नकुशलेचापरंप्रति॥४८॥गंतुमिच्छामिशास्त्रान्यागमाध्ययनहेतवे।इतितिस्रोथवापंचषड्वापृच्छाःकरोतिसः
॥४९॥एवमापृच्छ्ययोगींद्रंप्रेषितोगुरुणायतिः।आत्मचतुर्थएवौत्मतृतीयोवाजितेंद्रियः॥५०॥अथवा
सद्वितीयोसौनत्वाचार्यादिपाठकान्।निर्गच्छतिततःसंघादेकाकीनतुजातुचित्॥५१॥यतएकोगृहीतार्थो
विहारोखिलसद्रूपैः।समर्थानांद्वितीयोन्योगृहीतार्थेनसंश्रितः॥५२॥सामान्ययोगिनांयुक्तौचैतौभ्यांनापर

कोटिभिः॥७९॥यतोत्रविषमेकालेवंतारीरेचात्रकौटके।नि[illegible]वंचचलेचित्तेसर्वहीनेऽखिलेजने॥८०॥जायतेनेक
किनांनैवनिर्विघ्नंव्रतादिकं।स्वप्नेपिनमनःशुद्धिःनिःकलंकंनदीक्षणं॥८१॥विज्ञायेत्यखिलाःकार्याःसंघाट
केनसंयतैः।विहारस्थितियोगाद्यातन्निर्विघ्नायशुद्धये॥८२॥इमांतीर्थकृतामाज्ञांमुक्त्वायेतुमार्गगाः।स्वेच्छावास
विहारादीन्कुर्वतेदृष्टिदूरगाः॥८३॥तेषामिहैवनूनंस्याद्ज्ञानचरणक्षयः।कलंकितांचकुत्साज्यांस्वपमा
नःपदेपदे॥८४॥परलोकेसर्वज्ञाज्ञोल्लंघनाद्यतिपापतः।श्वभ्रादिदुर्गतौघोरंभ्रमणंचचिरंमहत्॥८५॥इत्य
विनासे पायंविदित्वात्रामुत्रचैकेविहारिणां।अनुल्लंघ्यांजिनेंद्राज्ञांप्रमाणीकृत्यमानसे॥८६॥स्थितिस्थानविहारादी
न्समुदायेनसंयताः।कुर्वंतुस्वगुणादीनांवृद्धयेविघ्नहानये॥८७॥गच्छतातेनयद्वस्त्रंकिंचिद्विधार्थितोय
दीसचित्ताचित्तमिश्रंचद्रव्यंसपुस्तकादिकं॥८८॥अंतरालेत्रतस्यार्हएषसूरिर्नचापरः।एवंगुणविशिष्टः
स्यात्सोऽपिविश्वहितंकरः॥८९॥संग्रहानुग्रहाभ्यांचकुशलोधर्मप्रभावकः।स्वतोविख्यातकीर्तिर्जिनसू
त्रार्थविशारदः॥९०॥सत्क्रियाचरणाधारःषट्त्रिंशद्गुणभूषितः।गंभीरोऽब्धिरिवाक्षोभ्यःदांमयाक्षमासमोम
हान्॥९१॥सौम्येनचंद्रसादृश्यःस्वच्छांबुवत्प्रशांतवान्।पंचाचारजयेशूरोमिथ्यात्वशत्रुघातकः॥

CC-0. In Public Domain. Digitized by eGangotri

स्वात्मनाशः साईदृगादिभिः ॥६६॥ समस्तसंयमं स्यात्रविराधनाह्यमुनिभिः निकाचितानि पंच स्युः स्व[illegible]
कविहारिणः ॥६७॥ न तत्र कल्पते वासः सतां गुरुकुले भुवि यंत्रै ते गुणाढ्यो न पंचाधारा भवं संहो ॥६८॥ महान्सू
रिरूपाध्यायः प्रवर्त्तको गुणाकरः स्थविरश्च गणाधीशः पंचाधाराः परा इमे ॥६९॥ पंचाचाररतः शिष्यानुग्रहेतु
दि॰ शालो महान् दीक्षाशिक्षासंस्कारैराचार्यः स्याद्गुणार्णवः ॥७०॥ धर्म्मोपदेशको धीमान् धीमतां पाठको यतः
अंगपूर्वप्रकीर्णानां यो त्र तं विद्धि पाठकं ॥७१॥ चतुः श्रमणसंघानां चर्यादिमार्गदेशने । प्रवृत्याद्युपकारांद्यैः क
रोति सप्रवर्त्तकः ॥७२॥ बालवृद्धादिशिष्याणां सन्मर्यादोपदेशकः । यः सर्वशांश्रपायुक्त्या स्थविरः सोन्यमानि
तः ॥७३॥ गणस्य सर्वसंघस्य पालकः परिरक्षकः । योनानोपायशिक्षाद्यैर्ज्ञेयो गणधरोत्र सः ॥७४॥ भूमीशा
निकटे नूनं वसतां गुणराशयः । वर्द्धते साहचर्येण यथाब्धौ वायुनोर्म्मयः ॥७५॥ स्वेछावासविहारादिरतना
मेकाकिनां भुवि । हीयंते सद्गुणा नित्यं वर्द्धते दोषकोटयः ॥७६॥ अद्यात्र पंचमे काले मिथ्यादृग्दुष्टपूरिते ही
न संहननानां च मुनीनां चेचलात्मनां ॥७७॥ द्वित्रिचतुर्यादिसंख्येन समुदायेन देशमहत्तू । प्रोक्तो वासो विहार
श्चव्युत्सर्ग्गकरणादिकः ॥७८॥ सर्वैर्यतिशुभाचारो यस्याचारैर्जिनेश्वरैः आचारगुणचिह्नैर्नान्यथाचार्य

श्चएवंतिचभावयंतिनिपुणाःशक्त्याचरंस्य घ्नतःतेन ह मर्म्मवशात् गात्रं वरं सर्वार्थसिद्ध्यादिजं सुखं सौख्यमनारतं सु
तपसा मुक्तिं प्रयांति क्रमात्॥७२॥ ये सर्वे जिननायकाश्च परया शुद्ध्या बभूवुः पराः सिद्धा अंतविवर्जिता निरूपमा
प्राप्ताः शिवस्त्री परा येनागारसुभावनारतमहायोगास्त्रिधा साधवस्तेस्तु स्याममभावनाश्च सकलाः शुद्धीः प्रद
द्युर्निजाः॥७३॥ इति भट्टारकश्रीसकलकीर्त्तिविरचिते श्रीमूलाचारप्रदीपकाख्ये महाग्रंथे अनागारभावनावर्ण
नो नामाष्टमोधिकारः॥८॥ ॥ सिद्धांतसमयादीनां प्रणेतॄन् परमेष्ठिनः। त्रिजगन्नाथपूज्यांह्रीन् वंदे तद्गु
णसिद्धये॥१॥ अथाखिलागमस्यात्र दर्शनज्ञानयोः परः। चारित्रतपसोः सारभूतः श्रीजिनभाषितः॥२॥ महान्
यो ग्रंथसारः समयसाराभिधः सतां। सर्वार्थसिद्धिदो वक्ष्ये समासेन तमूर्जितं॥३॥ द्रव्यशुद्धिं परां क्षेत्रकालशुद्धी
च निर्मले। भावशुद्धिं समाश्रित्य दृढसंहननं परं॥४॥ चारित्रे यततेनित्यं दर्शनज्ञानपूर्वके। यः तपस्वी विरागी स
निर्वाणं लभते चिरात्॥५॥ धीरो वैराग्यसंपन्नः शिक्षितास्तोकमागमं। चारित्राचरणा सम्यग्दृष्टिः शुद्धलिंगापरः
६॥ वैराग्यवर्जितो ज्ञानी पठितासकलागमं। चारित्रविकलो जातु नैव सिध्यति विधेर्वशात्॥७॥ भिक्षां चर वसारण्ये
स्तोकं स्वाद त्यजाग्रां जिम। मा विधेहि तथासारं बहु जल्पनमात्मवान्॥८॥ सहस्व सकलं दुःखं जय निद्रां च भावय मैत्रीं च

नरत्नकं॥५९॥संयमारामसीमांतंदुर्गम्यंमंगवर्द्धितं।कषायमदनारातिव्रजैःपंचाक्षतस्करैः॥६०॥साधु
लोकभृतंरम्यंसद्ध्याननगरंपरं।अधिष्ठितामहाशीलसन्नाहाःखिलवर्मिताः॥६१॥रामतुंगगजारूढ
धैर्यचापकरांकिताः।रत्नत्रयशरोपेतामुनींद्रसुभटोत्तमाः॥६२॥निःशंकागुणमाकृष्यदृगादिशरवर्षणैः
मोक्षराज्यायनिघ्नंतिससैन्यंमोहविद्विषं॥६३॥ततोहतमहामोहानिर्धूतकर्मशात्रवाः।व्रजंतिमुक्तिसाम्रा
ज्यंशाश्वतंतेसुरार्चिताः॥६४॥श्रमयंतितपोभिर्येस्वात्मानंश्रमणाहितेसंयमंतिकषायान्वाखानियेतेत्र
संयताः॥६५॥ऋषयंतिस्वकर्माणिनमयंतिकिल्बिषं।वार्घयंतिचसद्बुद्धीःप्राप्नुवंतिमहर्षयः॥मन्यंतेत्र
परार्थानांसिद्धिंयेमुनयोत्रते।मत्याद्यैःपंचसज्ज्ञानैर्युतावामुनयोद्भुताः॥६७॥साधयंतिदृगादीनित्रीणियेतेत्र
त्रसाधवः।येषांनविद्यतेगारमनागारास्तएवहि॥६८॥येषांवीतोविनष्टोहिरागोदोषाखिलैःसमं।वीतरागा
स्तएवात्रत्रिजगन्नाथपूजिताः॥६९॥इतिसार्थकनामानंवीरागतपस्विनांपरमध्यानशुद्ध्यैनैराग्याययोगिनां
॥७०॥इतिजिनमुखजातायेत्रशुद्धीर्दशैवंद्यशुभसकलहेत्रीः॥स्वर्गमोक्षादिकर्त्रीः।परमचरणयत्नैःपालय
त्यात्मशुद्ध्यैरहितविधिमलागास्तेचिरात्स्युर्महांतः॥७१॥एतामुक्तिवधूसखीश्चपरमानागारसद्भावनाये

यापनिनां ४३

नाराध्यासेवेत तस्यां स्वचित्तमंजसा। वर्जनीयस्ततस्तेन सर्वसंघो शिथिलो द्रुतं॥ ६॥ व्यामोहेनाथवाचार्यो शुद्धं गृ
ह्णाति तादृशां। ततः सोपि गणी नूनं छेदार्हः स्यान्न चान्यथा॥ ७॥ एवं मुक्ते क्रमे येषु प्राघूर्णक उपस्थितः॥ गृ
हीतो विधिनानेन कुर्याद्वैनतस्त्रिदो॥ ८॥ सम्यग् द्रव्यधरांगाद्यानं प्रतिलेख्य प्रयत्नतः क्षेत्रकालविशुद्धी
च भावशुद्धं कृतांजिको॥ ९॥ विधाय सूरिमानम्योपचारविनयादिभिः शिष्येणात्र त्रिशुद्ध्या स दाध्येत यो
जिनागमं॥ १०॥ सुसूत्रार्थोस्म संस्कार शिक्षालोभादिभिर्न सः। कुर्यात्परिभवं शास्त्राणां द्व्यादि व्यतिक्रमे
॥ ११॥ यतः परिभवो नूनं ज्ञानस्याचार्यशिष्ययोः। अप्रीतिर्बुद्धिनाशश्च ज्ञानावरणकर्म च॥ १२॥ अपसंमापि
जिनेशाज्ञोल्लंघनं दुर्विनाशानां। कलहः क्षतहानिश्च बंधुवियोगादिकं भवेत्॥ १३॥ विज्ञायेसखिलैर्दक्षैः का
लादिशुद्धिमंजसा। रचा जिनागमं नित्यं मध्येतव्यं विशुद्धये॥ १४॥ संध्यारात्र्यपराह्णादीनां शुभयोः कालयोः सु
दा। प्रकाशो वसतौ तत्र कर्त्तव्यं प्रतिलेखनं॥ १५॥ ग्रामादिगमने कार्ये शुभे खिले उत्तरादि सुयोगे वा स्वाध्यका
योत्र पूर्ववत्॥ १६॥ वसतौ न्यगणे तेनाचार्यादितपोभृतां। वैयावृत्यं यथायोग्यं कर्त्तव्यं दशधादरात्॥ १७॥
अहोरात्रं भवोपक्षचतुर्मासाद्गोचराः सर्वा क्रिया विधातव्यास्तेन तैर्योगिभिः समं॥ १८॥ यस्मिन् गच्छे ६४

निक्षादान ७३

CC-0. In Public Domain. Digitized by Sarayu Trust Foundation eGangotri

न्यगुणाधरो योत्राचार्यैडिगंहितैः । अजय्यः प्राप्तवान्शिष्यः सविद्याप्त्यै क्रमेण तं ॥९३॥ आगछंतं निजा सं
प्राघूर्णकं सुसंयुतं । तं वीक्ष्य सहसा सर्वे समुत्तिष्ठंति संयतेः ॥९४॥ वात्सल्यहेतवे दद्याज्जिनाज्ञापालनाय च ।
परस्परं प्रणामाय ह्यासीयकरणाय वा ॥९५॥ ततः सप्तपदान् गत्वा भक्त्या तत्सन्मुखं च ते । प्रकुर्वंति यथायो-
ग्यं वंदनां प्रतिवंदनां ॥९६॥ तस्यागतस्य पथश्रमहरं वांघ्रिमर्दनादि ततः । रत्नत्रयं परिप्रश्नं प्रीत्यै कुर्युस्तपो-
धनाः ॥९७॥ आयातस्य त्रिरात्रं सत्परीक्षाकरणाय च । संघाटकः प्रदातव्यो नियमात्तेन सूरिणा ॥९८॥ आ-
गंतुकाश्च वास्तव्याः परीक्षंते परस्परं । प्रवबोधाय वृत्तानां यत्नेनाचरणाय च ॥९९॥ आवश्यकतनूत्स-
र्गस्वाध्यायप्रकरणादिषु । भिक्षाकाले मलोत्सर्गसमित्यादिप्रपालने ॥१००॥ विश्रांतस्तद्दिनं स्थित्वा परी-
क्ष्याचार्यमुत्तमं । स्वस्यागमनकार्यं सविनयेन निवेदयेत् ॥१०१॥ ततस्तस्य कुलं नाम गुरुं दीक्षादिनानि च
श्रुतागमनकाष्टादीन् गणी पृच्छति चादरात् ॥२॥ इति प्रश्नपरीक्षाद्यैर्यद्यसौ शुद्धमानसः ॥ विनीत उद्यमी
धीमान् व्रतशीलांपरिष्कृतः ॥३॥ तदास्य सूरिणा तेन निजशक्त्या समीहितं । श्रुतादिपाठनं सर्वं विधेयं वि-
धिपूर्वकं ॥४॥ यद्यशुद्धो व्रताचारैरागंतुकस्ततोस्य च । दातव्यं गणिना छेदोपनादिकं तप ॥५॥ यदीछेत्ति

Ganesh Varni Digambar Jain Sansthan

१०१ स्पर्शश्चरूपंचशब्दश्च मनश्च स्पर्शरूपशब्दमनांसि तैस्तेषु वा प्रवीचारा सुरतसौख्यानुभवनं येषां ते स्पर्शरू
पशब्दमनः प्रवीचाराः ईदृशानां तान्देवान् परिहृत्य सनत्कुमारादयः अच्युतस्वर्गपर्यंताः अमराः शे
षाइत्युच्यंते अस्यायमर्थः सनत्कुमारमाहेंद्र त्रिविष्टपोत्पन्ना दिवौकसः शरीरसंस्पर्शमात्रेणैव स्त्रियः
पुरुषाश्च मैथुनसुखमनुभवंति परां प्रीतिमाप्नुवंति आलिंगनस्तनजघनमुखचुंबनादि" क्रियया प्रकृष्टां मुदं
भजंते" तथा ब्रह्मब्रह्मोत्तरलांतवकापिष्टचतुःसुरलोकसंभवाः वृंदारकारूपं दिव्यं दिव्यांगनामनोहरवेषविलास ए५
मा६ चातुर्यसंगाररूपावलोकनमात्रेणैव परमानंदमाप्नुवंति" तथा शुक्रमहाशुक्रशतारसहस्रारसंजाता त्रिदशास्त
या दिव्यांगनानां भूषणध्वननमुखकमललालितभाषणमृदुहसनमधुरसंगानाकर्णनमात्रेणैव परां प्रीतिं सं
जिहते" तथा आनतप्राणतारणाच्युतत्रिदिवलब्धजनयः सुपर्वाणः निजांगनाचित्तसंकल्पमात्रेणैव परम
प्रीतिलक्षणं सुखमास्कंदति" इत्यर्थः शास्त्राविरोधेन ज्ञातव्यं व्याख्यानं। अथ यद्येवं तर्हि ग्रैवेयकादिसंभवा-
नां देवानां कीदृग्विधं सुखं वर्त्तत इति प्रश्ने अहमिंद्रसुखनिर्णयनिमित्तं सूत्रमिदमाहुः कुमारस्वामिनः ट ठ परे
अप्रवीचाराः परे नवग्रैवेयकनवानुदिशपंचानुत्तरसंजाताः सुमनसस्ते अप्रवीचाराः मनसापि मैथुनसुखानुभवनरहि-
ता भवंतीति भावः तेषां कल्पवासिभ्योपि परमप्रकर्षहर्षलक्षणं सुखमुत्कृष्टं वर्त्तते यतः प्रवीचारो हि कामसंभववेद १०१
नाप्रतीकारः स तु कामसंभवस्तेषां कदाचिदपि न वर्त्तते नाहमिंद्राणामवच्छिन्नं सुख[illegible]भवतीत्याजातं अथ

[illegible] एकदेशे अभिव्यापके [illegible] क्रियायोः यथा समंतात् [illegible] आदि [illegible] आदतो [illegible] नः प्लुत

[illegible]धः द्वितीयस्तु आकारमात्रो निरनुबंधः तत्र द्वयोर्मध्ये यः सानुबंधो ङकारानुबंधः स म[illegible]दायां अभिविधौ क्रि

यायोगे ईषदर्थे च वर्त्तते यस्तु वाक्ये स्मरणार्थे च वर्त्तते स निरनुबंधः स्वरे संधिं न प्राप्नोति यस्तु मर्यादादिषु चतुर्थे

ष्वर्थेषु वर्त्तते स स्वरे परे सानुबंधत्वात् संधिं प्राप्नोत्येव अस्मिन्नर्थे सूत्रमिदं वर्त्तते इ ई किं मा ओं दांतो [illegible] नाङ् निवृ

त्तश्च अस्यायमर्थः न इति संधिं न प्राप्नोति कोसौ अ च स्वरमात्रं यथा अ अर्हन् प्रसीद इ इंद्रं पश्य उ उत्तिष्ठ ओदंतः

ओकारांतो निपातः संधिं न प्राप्नोति यथा अहो अर्हंतं पश्य तथा अनाङ् आङ्वर्जितः निर्निपातः संधिं न प्राप्नो

ति यथा आ एवं किं तत्स्वरूपस्य इति वाक्ये आकार मात्रं। अस्मरणे यथा आ एवं तन्मया कृतं आङ् पुनः संधिं

प्राप्नोत्येव यथा आ आत्मज्ञानं मर्यादीकृत्य आत्मज्ञानात् इह हो जिनदत्तार्थः ईषदर्थे यथा आ इषत् उपरतेः प्लु निवर्त

तः प्लुतश्च संधिं न प्राप्नोति यथा आगच्छ भो जिनदत्त ३ अत्र उक्तं च मर्यादायामभिविधौ क्रियायोगे ईषदर्थयोगे आ

कारः स ङित् प्रोक्तो वाक्यस्मरणयोरङित् १ तदुदाहरणेषु श्लोकोयं आत्मज्ञानादेकदेशात् आ लोकात् उपरते जि

नः आ एवं तत्त्वमस्यार्थः आ एवं तत् कृतं मया २ इत्युक्ता आङ् संधिं प्राप्नोत्येव कणमुमास्वामिभिर्भगवद्भिः १

आये लीना दित्यत्र [illegible] संधिकार्ये न कृतं सत्यमुक्तं भवता असंहिततया सूत्रे निर्देशः असंदेहार्थ इति अथ

परैशानपर्यंतादेवा कायप्रवीचाराः सुखसहिता वर्त्तते तर्हि सनत्कुमारादारभ्य अच्युतपर्यंताः कीदृशं सुखम

नुवर्त्तते इति प्रश्नेऽस्मिन् सूत्रमिदमुच्यते ७ शेषाः स्पर्शरूपशब्दमनःप्रवीचाराः शिष्यंते अत्र व शिष्यंत इति शेषाः

१०२ रगगंधर्वयक्षराक्षसभूतपिशाचाः २ व्यंतराविविधदेशांतराणि निवासायेषांतेव्यंतरा इत्यंसामान्यसंज्ञा अन्वर्थाव
र्त्तते सत्यार्थावर्त्तते कानिदेशांतराणितेषां निवासा इतिचेत् निरूपयति एतस्मात् जंबूद्वीपात् असंख्येयद्वीपसमुद्रान्
व्यतिक्रम्य स्थिते खरपृथ्वीभागे किंनरकिंपुरुषमहोरगगंधर्वयक्षभूतपिशाचानां सप्तप्रकाराणां व्यंतराणां
निवासाःसंति राक्षसानांतुनिवासाः तद्भागसमे खरभागसमपंकबहुलभागेवर्त्तंते किंनराश्च किंपुरुषा
महोरगाश्च ४ श्च गंधर्वाश्च यक्षाश्च राक्षसाश्च भूताश्च पिशाचाश्चेति द्वंद्वः तेतथोक्ताः एते अष्टप्रकारा व्यंतरा विशेष
संज्ञा ज्ञातव्याः "देवगतिविशिष्टनामकर्मोदयसमुत्पन्ना इत्यर्थः" अथ तृतीयनिकायस्य सामान्यविशेषसंज्ञाप
नार्थं सूत्रमिदमुच्यते १२ ज्योतिष्काः सूर्याचंद्रमसौग्रहनक्षत्रप्रकीर्णकतारकाश्च ज्योतिःस्वभावत्वात् ज्योति
ष्काः सूर्यश्च चंद्रमाश्च सूर्याचंद्रमसौ देवता द्वंद्वे इतिसूत्रेण पूर्वपदस्याकारः ग्रहाश्च नक्षत्राणि च प्रकीर्णकता
रकाश्च ग्रहनक्षत्रप्रकीर्णकतारकाः चकारः परस्परंसमुच्चयेवर्त्तते तेनायमर्थः न केवलं सूर्याचंद्रमसौ ज्यो
तिष्काः किंतु ग्रहनक्षत्रप्रकीर्णकतारकाश्च ज्योतिष्काः वर्त्तंते सूर्याचंद्रमसोः पृथग्ग्रहणं प्रभादिकृतप्रा
तारिका ७९०
धान्यनिमित्तं एषां स्थितिसूचनार्थमियं गाथा वर्त्तते नवदुत्तरसत्तसया दससीदी चदुदुगं तियचउक्कं तारारवि नी
ससिरिक्खा बुहभग्गवगुरुअंगिरारसणी २ अस्यायमर्थः नवत्युत्तरसप्तशतयोजनानि समभूमिभागा १०३
दूरं गत्वा पुष्पवत्प्रकीर्णाः तारका लभ्यंते" तारकतारकाः सर्वेषां ज्योतिष्काणां अधोभागा विन्यस्ता ज्ञा

चंद्रस्याधःस्तनके राहु २

तारका [illegible] ३

अधःस्तनाकप्रकेतु ३

Sarayu Trust, Digambar Jain Institute, Narla, Varanasi

सामान्य

दे[illegible]प्रकाराः प्रथमनिकायत्रिवुधास्तेषामुत्सर्गापवादसंज्ञाप्रज्ञाननिमित्तभा[illegible]भवनवासिनः असुरादयोद
शप्रकाराः अपि सुरा भवनवासिन इत्युच्यते [illegible] इति उत्सर्गेण सामान्येन संज्ञा वर्त्तते अथापवादेन विशेषनया
तेषां निर्जराणां संज्ञा संज्ञाप्यते तथाहि असून् प्राणान् रांति गृह्णंति परस्परयोधने न नारकानां दुःखमुत्पादयंतीत्यसु
राः न सुरा वा असुराः प्रायेण संक्लिष्टपरिणामत्वात् नगरेषु पर्वतेषु चंदनादिषु वृक्षेषु वा भवा नागाः विद्योतंते इति
विद्युतः सुष्ठु शोभनानि पर्णानि पक्षा येषां ते सुपर्णाः अंगंति पातालं विहाय क्रीडार्थमूर्द्ध्वमागच्छंतीति अग्नयः वांति
तीर्थंकरविहारमार्गं शोधयंतीति वाताः स्तनंति शब्दं कुर्वंति स्तनशब्दः संयातो वा येषां ते स्तनिताः उदानि उदकानि धीयं
३७ ते येषु ते उदधयः उदधिक्रीडायोगात् उदध्यापि उदधयः द्वीपक्रीडायोगात् द्वि विषादोपि द्वीपाः दिशंति अतिसर्पयंति
अवकाशमिति दिशः दिक्क्रीडायोगादमरांधसोपि दिशः असुराश्च नागाश्च विद्युतश्च सुपर्णाश्च अग्नयश्च वाताश्च
स्तनिताश्च उदधयश्च द्वीपाश्च दिशाश्च असुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिशः ते च ते कुमाराः ते त
थोक्ताः अस्यायमर्थः विशिष्टनामकर्मोदयजनितदेवत्वस्वभावेपि वाहनायुधभूषावेषादिक्रीडारतानृपकुमारव
त्प्रतिभासंते ये ते असुरकुमारादयो रूढिंगता असुरकुमाराणां पंकबहुलभागे भवनानि वर्त्तंते शेषाणां नवानां
खरबहुलभागे भवनानि संति खरबहुलपंकबहुलअप्बहुलभागत्रयव्यवस्थितिस्तु पूर्वमेव वर्णितेति ज्ञातव्यं
अथेदानीं द्वितीयस्य निकायस्य उत्सर्गापवादसंज्ञापनार्थं सूत्रमिदमाहुः ए ८ व्यंतराः किंनरकिंपुरुषमहो

१२१ जोजनैर्मेरुं विहाय १

१०३ कर्मोदयस्यैवचित्रत्वात् मेरुपरिहृत्य प्रदक्षिणासंतन्वंति उक्तंच इगवीसेक्कारसयं विहायमेरुंचरंति जोतिग
णः चरंतियवज्जिआ सेसाउचरंतिएकवहो १ अथविशेषः जंबूद्वीपोपरि द्वौसूर्यौवर्त्तेते षट्पंचाशन्नक्षत्रा
णिसंति षट्सप्तत्यधिकं मेकंशतंग्रहाणांचवर्त्तते लवणोदसमुद्रोपरि दिनमणयश्चत्वारःसंति द्वादशाधि
कंशतमुडूनांचवर्त्तते द्वापंचाशदधिकशतत्रयंग्रहाणांचवर्त्तते धातकीषंडोपरिद्योतनाद्वादशवर्त्तते शेष
ट्त्रिंशदधिकंशतत्रयंनक्षत्राणांचवर्त्तते षट्पंचाशदधिकंसहस्रंग्रहाणामस्ति कालोदसमुद्रोपरिद्योत
नवः द्विचत्वारिंशत्संति षट्सप्तत्यधिकानिएकादशशतानिनक्षत्राणांचवर्त्तते षण्णवत्यधिकानिषट्त्रिंशच्छ
तानिग्रहाणांसंति पुष्करार्द्धद्वीपोपरिद्वासप्ततिरंशुमालिनोवर्त्तते षोडशाधिकंसहस्रद्वयंनक्षत्राणांचवर्त्तते ष
ट्त्रिंशदधिकानित्रिषष्टिशतानिग्रहाणांवर्त्तते मानुषोत्तराद्बहिः पुष्करार्द्धपुष्करसमुद्रेचसूर्यादीनांसंख्याप
रमागमाद्बोद्धव्या यत्रयावंतःसूर्यास्तत्रतावंतःचंद्रमसोपिवेदितव्याः बहुविधगणनानिनक्षत्राणिचज्ञा
तव्यानि अथवासर्वत्रएकैकस्यकुमदबांधवस्यसंबंधिनोग्रहा अष्टाशीति[illegible]भवंति एकैकस्यजै
वातृकस्यअष्टाविंशतिनक्षत्राणिभवंति मानुषोत्तराभ्यंतरेऽयंनिर्णयः अथेदानींगतिमतांज्योतिष्का
णांसंबंधेनव्यवहारकालः प्रवर्त्तत इतिसूचयन्सूत्रमिदमाह १३ तत्कृतः कालविभागः तैर्ज्योति
ष्कैर्ज्योतिष्कगत्याचकृतः तत्कृतः तत्क्रियाविशेषपरिछिन्नः अन्यमानादेरपरिछिन्नो अन्यमानादेर १०३

CC0. In Public Domain. Digitized by Sarayu Trust Foundation

ति तारकाभ्य उपरि दशयोजनानि गत्वा सूर्याश्चरंति सूर्येभ्य उपरि अशीतियोजनानि गत्वा चंद्रमसश्चरंति चंद्रमोभ्य उपरि चत्वारि योजनानि गत्वा अश्विनीप्रभृतीनि नक्षत्राणि भ्रमंति नक्षत्रेभ्य उपरि चत्वारि योजनानि गत्वा बुधा भ्रमंते बुधेभ्य उपरि त्रीणि योजनानि गत्वा भार्गवाः शुक्राः संति शुक्रेभ्य उपरि त्रीणि योजनानि गत्वा अंगिरसो बृहस्पतयः संति अंगिरोभ्य उपरि त्रीणि योजनानि गत्वा आराः मंगलाः वर्तंते आरेभ्य उपरि त्रीणि योजनानि गत्वा सनयोआवृत्ति सूर्यादधः मनागूनयोजने केतुर्वर्तते चंद्रादधोभागे ईषदूनयोजने च राहुरस्ति एकां विमाना कारप्रतिपत्त्यर्थमियं गाथाः उत्ताणद्धयगोलगदलसन्निहसव्वजोइसविमाना वर्त्तंते चंद्रसूर्यग्रहेन वर्जयित्वा उत्तानस्थितार्द्धगोलकाकाराः सर्वेषां ज्योतिष्काणां विमाना वर्तंते चंद्रसूर्यग्रहेण वर्जयित्वा शेषानक्षत्रप्रकीर्णकतारकाश्च एकस्मिन्निजनिजमार्गे व्रजंति अथेदानीं ज्योतिष्कगतिविशेषप्रतिपत्त्यर्थं सूत्रमिदमुच्यते १३ ॥ मेरुप्रदक्षिणानित्यगतयो नृलोके मेरोः प्रदक्षिणा मेरुप्रदक्षिणाः नित्या निचरति गमनं येषां ज्योतिष्काणां ते नित्यगतयः नृणां लोको नृलोकस्तस्मिन्नृलोके अस्यायमर्थः सर्वे ज्योतिष्का मेरुप्रदक्षिणेन गत्वा भ्रमंति नित्यगतयः एणमपि ज्योतिष्काणां गतिः केनापि भक्तुं न शक्यते ते तु मनुष्यलोकोपरिस्थिता ज्योतिष्का सदागतयो भवंति अंधाराधेययोरैक्योपचारात् ज्योतिष्केरारूढा विमाना भ्रमंति अर्द्धतृतीयेषु द्वीपेषु द्वयोश्च समुद्रयोरुपरि नित्यगतयो वर्तंते मानुषोत्तरपर्वतात् बहिः ज्योतिष्का न भ्रमंतीत्यर्थः अचेतना विमानाः कथं प्रभवंति सत्यं प्रदक्षिणागत्यविरतैराभियोग्यदेवैः प्रेरिता विमाना गतिं कुर्वंति ।

३५

गोलाकार

△

द्वि २

केनं धर्म्मधीः गृह्णाति केवलं नीरं धर्म्मध्यानसमाधये॥१४॥ पंक्त्याद्यत्याज्यानुपानं च परित्यज्य करोति सः परलोकोत्तम
र्थाय ह्युपवासान्निरंतरान्॥१५॥ मुंडनं दशधा मुंडानां करोत्येष सुयुक्तितः संकोच्येंद्रियवाक्कायमनोवयवचंचलान्॥
॥१६॥ स्वस्वार्थविषयेषूच्चैर्व्रजतः पंचखान्सकामं। जिव्हाघ्राणत्वोस पंचेंद्रियमुंडनं कुरुते बलात्॥१७॥ मौनेन वचसां
स्त्वा मुंडनं हस्तपादयोः वपुषो रोधनं युक्त्या स्वेच्छाचलनाद्बुधः॥१८॥ निरुध्यांग्रतपासेन भ्रमंतं चित्तमर्कटं पंचेति
मुंडनान्येष करोति च शिवाप्तये॥१९॥ पंचेंद्रियाख्यमुंडाः स्युः मुंडा हस्तांघ्रिकायजाः मनोवचोद्विमुंडौ चामी मुंडा द
शाविर्णिताः॥२०॥ अमीभिर्मुंडनैर्दीक्षा सफला मुक्तिदा सतां एभिर्विना जिताक्षाणां शिरसो मुंडनं वृथा॥२१॥ तस्मिं
न्नं बहूपवासादिकरणे तीव्रवेदना क्षुधाद्यैर्यदि जायेत तदेति चिंतयेत् सुधीः॥२२॥ अहो क्षुद्वेदना श्वभ्रे साप्सावि
श्वान्नभक्षणैः अब्धिनीरैस्तृषापीडा चानुभूता मया चिरं॥२३॥ मयात्रारण्यशैलादौ मृगादिपशुजातिषु मृग
द्रंस्तादिभिः प्राप्ता तीव्रा क्षुत्तृड्कुवेदना॥२४॥ इत्याद्या अपरा घोराः क्षुत्तृषादिपरीषहाः भ्रमतात्र भवारण्ये
नुभूता दुस्सहा मया॥२५॥ सर्वो पुद्गलराशिश्चाद्यौत्र भक्षितो मया क्षुत्तृषाशांतये पीतमब्धौघिकं जलं॥२६॥
तथापि न मनाग्जाता तृप्तिर्मेन्नादिभक्षणैः किंतु नित्यं प्रवर्द्धेते तीव्रक्षुत्तृड्कुवेदने॥२७॥ यद्यंघनचयैरात्रिः स

२०३

क्रमरा

ज्ञातंसर्वेदुःकृतंत्यजाम्यहं।।९।।आत्मैवमेपरंज्ञानमात्माक्षायिकदर्शनं।आत्मापरमचारित्रंप्रत्याख्यानंचनिर्म्मलं।।१०।।
आत्मैवेसकलोयोगआत्मैवेमोक्षसाधनं।यतोतेतेगुणाःसंतिविनात्मानंनजातुचित्।।१।।एकाकीम्रियतेदेहीह्येव
उत्पद्यतेविधेः।एकोभ्रमतिसंसारेएकःशुध्यतिनीरजाः।।२।।एकोमेशाश्वतोह्यात्माज्ञानदर्शनलक्षणः।शेषासंगादयो
भावाबाह्याःसंयोगसंभवाः।।३।।येनसंयोगमूलेनप्राप्तादुःखपरंपरामयातंकर्मजंसर्वंसंयोगंव्युत्सृजाम्यहं।।४।।
मूलोत्तरगुणादीनांमध्येनाराधितोगुणः।यःकश्चित्तत्रिधादोषंगर्हेप्रतिक्रमामिच।।५।।भयान्सप्तमदानष्टौचतुःसंज्ञास्त्रि
गौरवान्।गर्हेहंत्रयस्त्रिंशदासादनाःसर्वथा।।६।।इहामुत्रभयोत्राणागुप्तिमृत्युभयानिच।वेदनाकस्मिकंश्चेदंत
हामिभयसप्तकं।।७।।विज्ञानैश्वर्यमाज्ञाचकुलजातितपोबलाः।रूपंसत्सुगुणेष्वत्रतेषुगच्छामिनोमदं।।८।।पंचैवे
वास्तिकायाश्चषड्जीवजातयस्ततःमहाव्रतानिपंचप्रवचनस्याष्टमातरः।।९।।पदार्थानवचोत्ताहित्रयस्त्रिंशदिति
स्फुटं।आसादनाजिनैर्जातुमनाक्कुर्यामयानभोः।।१०।।निंदनीयंचयत्किंचित्सर्वंनिंदामितद्धृदा।गर्हणीयमत्रत्यं
यंगर्हेतंगुरुसन्निधौ।।११।।इत्याद्यन्यश्चमेध्यानैःस्ववासहेरवनांहदि।कषायाणांपुनःकुर्यात्कायसल्लेखनांयति
।।१२।।षष्ठाष्टमादिपक्षैकमासाद्यनशनैःपरैःतपोभेदैर्द्विषड्भिश्चशोषयेत्क्रमतोवपुः।।१३।।ततस्त्यक्त्वाक्रमेणान्नंस्ते

इत्यादिसद्विचारैश्च धीरैर्धर्माश्रितैः परैः। परमेष्ठिप[illegible]मैरनुप्रेक्षाद्यैर्विचक्षणैः॥४२॥ आगमामृतपानैश्च तर्पयित्वाखिलं मनः स्वस्थं कुर्यात्सर्वज्ञः स्वात्मध्यानसमाधये॥४३॥ निर्विकल्पमनाध्यानी चिदानंदमयं परं। ध्यातुमारभते चित्ते परमात्मानमंजसा॥४४॥ अस्मिन्नवसरे योगी क्षीणदेहपराक्रमः। बाह्ययोगं विधातुं सोऽशक्तः सन्नपि धीधनः॥४५॥ योगमभ्यंतरं सारं सर्वाराधनपूर्वकं। एकचित्तेन मुक्त्यर्थं विधत्ते च निरंतरं॥४६॥ एतस्मिन् समयेऽदक्षो द्वादशांगाखिलागमं। चित्ते चिंतयितुं धीरः सोऽशक्तोऽपि महामनाः॥४७॥ सर्वसिद्धांतमूलं यत् पदमेकं द्वयादिकं। सारं तच्चिंतयेत्त्यक्त्वांगश्रुतं स्वध्यानसिद्धये॥४८॥ क्षीणगात्रे तदा तस्य दुर्व्याधिर्जायते यदि। सोऽघपाकेन तद्धान्यै हीदं गृह्णाति चौषधं॥४९॥ जिनेंद्रवचनं तथ्यं जन्ममृत्युजरांतकं। रोगक्लेशाहरं पथ्यं स्यांदिव्यदुःखक्षयंकरं॥५०॥ ग्राह्यं तद्धि मया सारं रोगक्लेशार्तशांतये। जन्मादिदाहनाशाय सुधारसमिवोर्जितं॥५१॥ अस्माद्रोगभवक्लेशाच्छरणं यामि संप्रति। सर्वार्हत्सिद्धसाधूनां शरण्यानां जगत्सतां॥५२॥ केवलिप्रोक्तधर्मस्य शरण्यस्याखिलापदि। तपोरत्नत्रयादीनां विश्वासातारिघातिनां॥५३॥ यतो लोकोत्तमा एते विश्वमंगलकारिणः। शरण्या भव्यजीवानां ममापि संतु सिद्धिदाः॥५४॥ धीरत्वेनापि मर्तव्यं कातरत्वेन वा यदि। कातरत्वं मुदा त्यक्त्वा धीरत्वे मरणं वरं॥५५॥ धीरत्वेनापि सोढव्यं रोगादिकर्मजं फलं। कातरत्वेन वा पुंसां धीरत्वेन

१०७

मुद्रश्च नदीशतैस्तृप्तिं नैति तथा जीवः कामभोगैः प्रमातिगैः॥२८॥ कांक्षितो मूर्छितो रागी कामभोगेष्वमानसो नित्यं
कलुषितो भूतो भुंजानोऽपि कुमार्गगः॥२९॥ भोगान् कुपरिणामेन श्वभ्रदुःखनिबंधनं। दुरंतं पापसंतानं बध्नाति
केवलं वृथा॥३०॥ आहारस्य निमित्तेन नरकं यांति सप्तमं। मत्स्याद्या दंततो नूनं मोहारोऽनर्थसागरः॥३१॥ पूर्वं कृत
तपोऽभ्यासश्चानिदानः शिवाप्तये। पश्चाद्धृतकषायो यो जित्वा सर्वान् परीषहान्॥३२॥ क्षुत्तृषादिभवांस्तीव्रान्
साधयन्मरणोत्तमं। धन्यः स एव लोकेऽस्मिन् सार्थं तस्य तपोऽखिलं॥३३॥ पूर्वं कृतं तपो घोराः प्रतिपालितस
द्व्रताः। पश्चात् कर्मगुरुत्वेन क्षुधाद्यैरिति परीषहैः॥३४॥ ये पतंति स्वधैर्यादेर्मृत्युकाले भवार्णवे। मज्जनं निश्चितं
ची तेषां वृथा तपोयमादिकं॥३५॥ इत्यादिचिंतनैरेषोऽक्षोभ्यः शुद्धचेतसा। सहते परया शक्त्या क्षुधातृषादिवेदनां
॥३६॥ क्षुत्क्षांधूरोदरस्यास्य क्षीणगात्रस्य योगिनः। चर्मास्थिमात्रशेषस्य काठिन्यसंस्तरेण वा॥३७॥ उत्पद्यते म
हादुःखं यद्यैषमानसे तदा। चिंतयेत् प्राक्तनं स्वस्य भवभ्रमणमंजसा॥३८॥ अहो जलस्थलाकाशे कंटकादिभवा
भुवि। प्राप्ता वेवसतां तुक्ष्णां महती वेदना मया॥३९॥ वज्रकंटकसंकीर्णे श्वभ्रे परवशोऽन्वभोः। सदुःखं वसितं पापा
च्चिरकालं मया विधेः॥४०॥ क्रियमाणं तस्त्रैयेवेदनां स[illegible]दन्नां॥ तिर्यग्भूतैति संतदुःखं सहते संस्तरोद्भवां॥४१॥

निइंद्रकविमानानि आकाशप्रदेशश्रेणिवत् यानि विमानानि चतुर्दिक्षु स्थितानि तानि श्रेणिविमानानि प्रकीर्ण
कुसुमवत् यत्रतत्र विक्षिप्तपुष्पाणीव यानि विमानानि प्रदिक्षु स्थितानि तानि पुष्पप्रकीर्णकानि अत्र विशेषः
जैनचैत्यालयाः ये सास्वतास्वर्तंते विमानेषु च ये देवप्रासादा वर्तंते ते सर्वेपि यद्यपि अकृत्रिमा वर्तंते तथापि तेषां
मानं मानवयोजनकोशादिकृतं ज्ञातव्यं अन्यानि सास्वतस्थानानि प्रमाणयोजनादिभिर्ज्ञातव्यानीति परिभाषे
यं परिभाषेति कोर्थः अनियमे नियमकारिणी परिभाषा अथेदानीं वैमानिकानां द्वैविध्यसूचनार्थं सूत्रमिदं
माहुः राचार्याः १६ कल्पोपपन्नाः कल्पातीताश्च कल्पेषु षोडशसु स्वर्गेषु उपपन्नाः संबद्धाः कल्पोपपन्नाः कल्पे
भ्योऽतीताः अतिक्रांताः उपरितनक्षेत्रवर्तिनः नवग्रैवेयकदेवाः नवानुदिशामृतासनाश्च पंचानुत्तरनिवासिनो
निर्जराश्च त्रिप्रकारा अपि अहमिंद्राः कल्पातीताः कथ्यंते ननु भवनवासिषु व्यंतरेषु ज्योतिष्केषु च इंद्रादीनां कल्पनं व
र्तते तेपि कल्पोपपन्नाः कथं नोच्यंते इत्याह सत्यं यद्यपि तेषु इंद्रादिषु कल्पो वर्तते तथापि वैमानिका एव कल्पोपन्ना
इति रूढिं गता यथा गच्छतीति गौः धेनुर्वृषभ एव गौरुच्यते गमनक्रियापरिणतोपि अश्वादिर्न गौरुच्यते इति अथेदा
नीं वैमानिकानां अवस्थितविशेषविज्ञापनार्थं सूत्रमिदमुच्यते १७ उपर्युपरि कल्पोपपन्नाः कल्पातीताश्च वैमा
निकाः उपर्युपरि ऊर्ध्वं ऊर्ध्वं वर्तंते तेषां विमानानि च पटलापेक्षया उपर्युपरि ऊर्ध्वं ऊर्ध्वं संति ज्योतिष्कवत् तिर्यगवस्थि
तानि वर्तंते व्यंतरवत् समव्यवस्थितानि च न संति इतस्ततो यत्र तत्र न वर्तंते किंतु उप[illegible]रि वर्तंते अथवा उपर्युप

CC0. In Public Domain. Digitized by Sarayu Trust Gangotri

तेषां निश्चलत्वप्रतिपादकं सूत्रमुच्यते बहिरवस्थिताः मनुष्य[illegible] सवे[illegible]
परिच्छिन्नस्य कालस्य नियतेनानवधारितस्य परिज्ञाने हेतुरित्यर्थः कालस्य सम[illegible]लिकादि व्यवहारं कोल
स्य विभागः कालविभागः कालो द्विप्रकारः मुख्यो व्यावहारिकश्च मुख्यः कालः परमाणुरूपः निश्चलः व्य
वहारकालहेतुभूतः संभृतत्रिभुवनेवर्त्तते मुख्यात्संजातो व्यावहारिकः समयावलिनाडिकादिलक्षणः मु
ख्यस्य कालस्य च लक्षणं पंचमाध्याये विस्तारेण सूचयिष्यंत्याचार्याः १४ ब अथेदानीं मानुषोत्तराद्बहिर्येव
स२ चं२ =। = कालोद स४२ चं४२ सू७२ चं७२
जंबूदीप५ र्त्तंते ज्योतिष्काः अवस्थिता निश्चला वर्त्तंते तदुक्तं दोदोवग्गा बारस बादाल बहत्तरि बिंबणसंख्या पुष्करद्द चं४ लवणोदे चतु सू४ धातकीखंडे सू१२ चं१२
सर्व मेरु इ स्थित
लोत्तिपरदो अवट्ठिदा सव्वे जोइगणा १ चंद्रसूर्यविमानविस्तारसूचनार्थ मियं गाथा जोयणमेगट्ठिक सू६
चं ५६ भाग सू ४८ भाग २=। २ किंचित ऊनो १ म बु श अर्द्ध क्रोश
एक कोश १ ये छप्पण अडदाल चंदसूराणं सुक्कगुरिदरतियाणं कोसं किंचूणकोसं कोसद्ध १ अस्यायमर्थः एकस्य प्रमाण ६ एक जोजन के
योजनस्य एकषष्टिभागाः क्रियंते तन्मध्ये षट्पंचाशत्भागाः चंद्रविमानस्य उपरितन विस्तारो वर्त्तते सूर्यवि भाग ६१
मानस्य तु उपरितनभाग अष्टचत्वारिंशत्भागमात्रो वर्त्तते शुक्रविमानविस्तारस्तु कोसमात्रः बृहस्पतेस्तु किं
चिदूनक्रोशः मंगलबुधशनीनां तु अर्द्धक्रोशमात्र इत्यर्थः अथेदानीं चतुर्थस्य निकायस्य सामान्येन संज्ञां नि
रूपयति १५ ब वैमानिकाः विशेषेण आत्मस्थान् सुकृतवतो जीवान् मानयंति यानि तानि विमानानि विमानेषु भ
वा ये ते वैमानिकाः अत ऊर्द्ध्वं ये वर्णयिष्यंते ते देवा वैमानिकसंज्ञा भवंति इत्यधिकारसूत्रमिदं ज्ञातव्यं तानि विमाना
नि त्रिप्रकाराणि भवंति इंद्रकविमानानि श्रेणिविमानानि प्रकीर्णविमानानि चेति यानि इंद्रवत् मध्ये व्यवस्थितानि ता

१०५ रस्वर्गसाहचर्यात् वास्तोःपतिरपि सहस्रारः॥ आसमंतात् सर्वज्ञचरणेषु नतः आनतो ह्यप्रास्वभावात् तस्य निवासः स्वर्गः आन
तः आनतस्वर्गसाहचर्यात् वासवोपि आनतः॥ प्रकर्षेण आसमंतात् सर्वज्ञचरणेषु नतः प्राणतः बहुजीवस्वभावात् तस्य नि कमंले २
स्वर्गे ३ वासः स्वर्गः प्राणतः॥ प्राणतसाहचर्यात् गोत्रभिदपि आनतः गोत्राणि जिनसहस्रनामानि भिनत्ति॥ अर्थं पूर्वं जानाती।
तिगोत्रभिद्॥ ननु पर्वतपक्षछेदकत्वात् पर्वतानां पक्षसद्भावाभावप्रतीतेः आसमंतात् आरणः प्रसिद्धनामकः आर
णः आरणस्य निवासः स्वर्गोपि आरणः॥ आरणस्वर्गसाहचर्यात् सूत्रामापि आरणः॥ नधर्मोच्युतः अच्युतः सततमनुःस्व
भावात् तस्य निवासः स्वर्गः अच्युतः अच्युतस्वर्गसाहचर्यात् दुश्च्यवनोप्यच्युतः॥ उपर्युपरि इति वचनात्॥ सिद्धांतापेक्षया
ततोपरि व्यवस्था भवति॥ कासौ व्यवस्था पूर्वं सौधर्मैशानकल्पौ॥ तयोरुपरि सानत्कुमारमाहेंद्रौ॥ तयोरुपरि ब्रह्मलोकब्रह्मोत्तरौ॥
शुक्रमहाशुक्रे ६ तयोरुपरि लांतवकापिष्टौ तयोरुपरि सतारसहस्रारौ॥ तयोरुपरि आनतप्राणतौ॥ तयोरुपरि आरणाच्युतौ॥ तदा नव
सुग्रैवेयकेषु वैमानिका देवा भवंति॥ नवस्थिति पृथक् विभक्तिकरणान् नवग्रैवेयकानंतरं नवानुदिसवैमानिका भवंती।
ति ज्ञातव्यं॥ तदनंतरं विजयवैजयंतजयंतापराजितसर्वार्थसिद्धिपंचानुत्तरवैमानिका भवंति॥ सर्वार्थसिद्धिग्रहणस्य पृथ
क् विभक्तिकरणं सर्वनामोत्तमत्वसूचनार्थं॥ नामप्रकृतिषु तीर्थकरत्वं चेति यथा अथ विस्तारः योजनलक्षोन्नतः किल मेरुप
र्वतः तन्मध्ये एकं योजनानां सहस्रं भूमिमध्ये वर्तते॥ नवनवतियोजनसहस्राणि बहिः स्थितानि॥ तन्मध्ये चत्वारिंशद्योजना। १०५
नि उन्नता तच्चूलिका वर्तते॥ सा चूलिका ऋजुविमानं वालाग्रमात्रमप्राप्य स्थिता मेरोरधस्तात् अधोलोकः॥ मेरुप्रमाणवाङ्

ऐशानः ऐशानस्वर्गसाहचर्यात् त[illegible]क्ये शानः ६ • नामा[illegible]सु स्वर्गो[illegible] स्या[illegible] स्वर्गः सनत्कुमारः ६
रित्ययं शब्दः समीपवर्त्तीवर्त्तते तत्रैवं अर्थघटनाकर्त्तव्याः यस्मिन्पटले सौधर्मस्वर्गो द[illegible]क्षिणदिशि वर्त्तते तस्मिन्नेव
पटले उत्तरदिशि समीपवर्त्ति ईशानस्वर्गोस्ति एवं त्रिपटलं यथासंभवं द्विद्विस्वर्गविचार अच्युतांते कर्त्तव्यः अथ कि
यत्सु कल्पविमानेषु देवा भवंतीति प्रश्ने सूत्रमिदमाहुः भगवंतः १८ ॥ सौधर्मैशानसनत्कुमारमाहेन्द्रब्रह्मब्रह्मोत्तरलांत
वकापिष्टशुक्रमहाशुक्रसतारसहस्रारेष्वानतप्राणतयोरारणाच्युतयोर्नवग्रैवेयकेषु विजयवैजयंतजयंतापराजिते
षु सर्वार्थसिद्धौ च सुधर्मानाम्नी देवसभा वर्त्तते सा विद्यते यस्मिन्स सौधर्मः स्वर्गः तत्स्वर्गसाहचर्यात् इंद्रोपि सौधर्मः
ईशानो नाम इंद्रः स्वभावात् तस्य निवासः स्वर्गः सनत्कुमारो सानत्कुमारस्वर्गसाहचर्यात् विडौजा अपि माहेंद्रः ॥
ब्रह्मनाम आखंडलः स्वभावात् तस्य निवासः स्वर्गोपि ब्रह्म ब्रह्मस्वर्गसाहचर्यात् ब्रह्मनाम आखंडलः ॥ ब्रह्मोत्तरना
मा ऋभुक्षा स्वभावात् तस्य निवासः स्वर्गो ब्रह्मोत्तरः ॥ ब्रह्मोत्तरस्वर्गसाहचर्यात् सहस्राक्षोपि ब्रह्मोत्तरः ॥ लांतवो नाम मे
घवाहनः स्वभावात् तस्य निवासः स्वर्गः लांतवस्वर्गसाहचर्यात् तुराषाडपि लांतवः ॥ कापिष्टो नाम दुश्च्यवनः स्वभावा
त् तस्य निवासः स्वर्गः कापिष्टः कापिष्टस्वर्गसाहचर्यात् संक्रंदनोपि कापिष्टः ॥ शुक्रो नाम सुछिम्हनः स्वभावात् तस्य
निवासः स्वर्गः शुक्रः शुक्रस्वर्गसाहचर्यात् स्वराडपि शुक्रः ॥ महाशुक्रो नाम हरिहयः स्वभावात् तस्य निवासः स्वर्गः महाशु
क्रः महाशुक्रस्वर्गसाहचर्यात् जंभभेद्यपि महाशुक्रः ॥ शतारनामा सचीपतिः स्वभावात् तस्य निवासः स्वर्गः शतारः
शतारस्वर्गसाहचर्यात् वलभातिरपि शतारः ॥ सहस्रारनामा सुरपतिः स्वभावात् तस्य निवासः स्वर्गोपि सहस्रारः सहस्रा

१०६ नश्रेण्यो निर्गताः प्रत्येकं एकत्रिंशद्विमानाः प्रदिक्षु चतसृषु पुष्पप्रकीर्णक विमाणानि वर्त्तंते ततः परं एकैकस्य प
टलस्य एकैकस्यां श्रेणौ एकैकं विमानं हीनं भवति तेन सप्तमपटले इंद्रक विमानात् चतुर्दिक्षु चतस्रो विमानश्रेण्यः पंच
विंशति विमानाः प्रत्येकं भवंति तन्मध्ये दक्षिणश्रेणौ पंचदशं स्वर्गविमानं सानत्कुमारेंद्रो भुनक्ति उत्तरदिशि तु पं
चदशं कल्पविमानं माहेंद्रपतिः पालयति तत उपरि ब्रह्मलोक ब्रह्मोत्तरस्वर्गौ वर्त्तेते तयोश्चत्वारि पटलानि तत्र प्रथ
मं पटलं अरिष्टंनाम तन्मध्यप्रदेशे अरिष्टनामकं इंद्रविमानं वर्त्तते तस्माद्विमानाच्चतुर्दिक्षु चतस्रः श्रेण्यः प्रत्ये
कं चतुर्विंशति विमानाः विदिक्षु पुष्पप्रकीर्णकानि भवंति पटलं श्रेणौ श्रेणौ एकैकं विमानं हीनं भवति तेन चतुर्थपटले
ब्रह्मोत्तरनाम्नि श्रेणि विमानानि प्रत्येकं एकविंशतिर्भवति तत्र चतुर्थपटले दक्षिणश्रेणौ द्वादशस्य विमानस्य स्वामी ब्रह्मो
नामदेवेंद्रो वर्त्तते उत्तरश्रेणौ तु द्वादशस्य विमानस्य स्वामी ब्रह्मोत्तरइति उत्तरं लांतवकापिष्ठसंज्ञकौ स्वर्गौ वर्त्तेते तयोर्द्वे
पटले ब्रह्महृदयलांतवनामके तत्र लांतवपटलमध्यप्रदेशे लांतवं नाम इंद्रक विमानमस्ति तस्य विमानस्य चतुर्दिक्षु
चतस्रश्रेण्यः प्रत्येकं एकोनविंशति विमानाः तत्र दक्षिणश्रेणौ नवमं विमानं लांतवेंद्रो भुनक्ति उत्तरश्रेणौ तु नवमं वि
मानं कापिष्ठः पतिः पालयति तत्र उपरि शुक्रमहाशुक्रनामानौ द्वौ स्वर्गौ वर्त्तेते तयोर्द्वयोरपि स्वर्गयोएकमेव पटलं वर्त्त
ते तस्य नाम महाशुक्रं भवति तस्य पटलस्य मध्यप्रदेशे महाशुक्रं नाम इंद्रक विमानं वर्त्तते तस्माद्विमानस्य चतुर्दिक्षु चतस्रः १०६
श्रेण्यः संति प्रत्येकं अष्टादश विमानाः तत्र दक्षिणश्रेण्योः द्वादशं विमानं शुक्रेंद्रो भुनक्ति उत्तरश्रेणिगं द्वादशं वि

तस्तिर्यग्लोकः॥ मेरोरुपरि सर्वार्थसिद्धिपर्यंतं ऊर्द्ध्वलोकः॥ सौधर्मैशानसंबंधीनि एकत्रिंशत्पटलानि तन्मध्ये प्रथमऋजुपटले ऋजुप
टलस्योपरि मध्यप्रदेशे ऋजुविमानं नाम इंद्रकं वर्त्तते॥ इंद्रकमिति कोर्थः॥ मध्यविमानं तत्प्रथमम् इंद्रकं पंचचत्वारिंश
४५ ल्लक्षयोजनविस्तृतं॥ तस्मादिंद्रकात् चतुर्दिक्षु चतस्रो विमानश्रेणयो निर्गताः॥ प्रत्येकं ६२ द्विषष्टि विमानसंख्याः॥ चतुर्दि
क्षु पुष्पप्रकीर्णविमानानि वर्त्तंते॥ एकस्मात् ऋजुपटलादुपरि एकैकस्य पटलस्य॥ एकैकस्यां श्रेण्यां एकैकं विमानं हीनं
भवति॥ यावत् प्रभानामकमंत्यमेकत्रिंशत्पटलं वर्त्तते॥ प्रभापटलस्योपरि मध्यभागे प्रभासंज्ञं यदिंद्रकं विमा
नं वर्त्तते॥ तस्य इंद्रकस्य चतुर्दिक्षु चतस्रो विमानश्रेणयः संति॥ प्रत्येकं ३२ द्वात्रिंशद्विमानसंख्या वर्त्तते॥ तासां चतसृ
णां विमानश्रेणीनां मध्ये या विमानश्रेणिर्दक्षिणां दिशि गता तस्यां श्रेण्यां यदष्टादशं १८ विमानं वर्त्तते॥ तद्विमानं सौधर्मे
न्द्राधिष्ठानं॥ उत्तरश्रेण्यां तु यदष्टादशं १८ विमानमस्ति॥ तस्मिन् विमाने ऐशानेंद्रो वसति॥ द्वयोरपि विमानयोः प्रत्येकं त्रयः
प्राकाराः॥ तेषु प्राकारेषु मध्ये बाह्यप्राकाराभ्यंतरे अनीकानि पारिषदाश्च देवा वसंति॥ मध्यप्राकाराभ्यंतरे सचिवदेवा वर्त्तंति॥
अभ्यंतरप्राकाराभ्यंतरे इंद्रो वसति॥ एवं सर्वत्र इंद्रादीनां स्थितिर्युक्तिर्ज्ञातव्या॥ पूर्वदक्षिणपश्चिमतिस्रः श्रेणयः॥ अग्निको
णनैरृत्यकोणयोः पुष्पप्रकीर्णकानि सौधर्मस्वर्गे उच्यते॥ उत्तरश्रेणिरेका वायुकोणऐशानकोणयोः पुष्पप्रकीर्णविमाना
